International Journal of Applied Research 2019; 5(9): 350-351




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2019; 5(9): 350-351
www.allresearchjournal.com
Received: 10-06-2019
Accepted: 21-08-2019

**डॉ. अशोक कुमार**
ग्राम + पत्रालय–फेंट, प्रखण्ड–बासोपट्टी, जिला–मधुबनी, बिहार, भारत

**Correspondence**
**डॉ. अशोक कुमार**
ग्राम + पत्रालय–फेंट, प्रखण्ड–बासोपट्टी, जिला–मधुबनी, बिहार, भारत

# संस्कृतसाहित्ये वर्णितसंस्काराणामाधुनिकयुगे वैज्ञानिकता

**डॉ. अशोक कुमार**

**सारांशः –**
मानवस्य दैहिकविकाशाय, बौद्धिकविकाशाय शुद्धये च गर्भाधानदारभ्य अन्त्येष्टिपर्यन्तम् उचिते समयान्तराले सम्पाद्यन्ते। वस्तुतः मान्यतैषा दृढ़ाऽऽसीत् यत् विधि पूर्वकं संस्काराणामनुष्ठानेन मनुष्यः संस्कृतो भवति, तस्मिंश्च विलक्षणा अवर्णनीयाश्च गुणा प्रादुर्भवन्ति।

**कूट शब्दः** वैज्ञानिकता, मानवस्य दैहिकविकाशाय, संस्कृतसाहित्ये

**प्रस्तावना**

मानवे पूर्वजन्मनः कर्मणां संस्कारास्तु तिष्ठन्त्येव। गर्भस्य मातापितोः अनुवांशिकतायाः संस्काराः अपि तिष्ठन्ति। तेषु केचन संस्काराः शुभाः, केचनाशुभाश्चापि भवन्ति अशुभ संस्काराः विकाराः इत्यभिधीयन्ते। विकारा मानवेषु जाड्यमुत्पादयन्ति, किन्तु संस्कारा जीवेषु लिप्तान् विकारान् प्रशमयन्ति, तेषु च किमपि वैशिष्ट्यं जनयन्ति। अस्मिन्नर्थे संस्कारैः परिष्करणं परिमार्जनं चापेक्षितं वर्तते। स्वर्णिभ्यो निष्काशितं रत्नं स्वर्णादिकं वा मृदायुक्तम् अधटितं च भवति। तस्मिन् प्रकाशं सौन्दर्य चाभिमवर्धयितुम् तद्रत्नं ताप्यते, सुष्ठुघक्षते, कार्त्यते, दीप्यते।

अतः मानवेऽपि मानवीयशक्तेः सौन्दर्य चाधानाय तेन सुसंस्कृतेन भवितव्यम्। जीवस्य संस्काराः अप्येवम्भूता एव सन्ति। बीजगतानां गर्भगतानां च दोषाणामपनयनम्, जीवने चेतनमाधाया पुरुषार्थप्राप्तेः योग्यतायाः उत्पादनं च संस्काराणां प्रमुखं प्रयोजनं वर्तते।

वयं पश्यामो यन्मनुष्यस्य मनोवृत्तयस्तस्य आहारानुगुणं व्यवहारानुगुणं च परिवर्तनं यान्ति। अर्थात् यादृशः कश्चिदाहारः सात्विको राजस्तामसो वा तादृश्यमेव तस्यमनोवृत्तिरति भवति।

मानवीयो व्यवहारेऽपि तस्य मानसिकवृत्तिं परिवर्तयति। तथैव संस्कारानुगुणमपिमनुष्यस्य मनोवृत्त्यः परिवर्तनं प्राप्नुवन्ति। पृथिव्यामृदा यथा उर्वरकादिसंस्कारैः उत्तरोत्तरं परिवर्धयते तथा सा उत्तमफलप्रदेति दरीदृश्यन्त लोके। वयमपि तदवदेम स्म। अस्माकं देहोऽपि पञ्चभूतैः निर्मितो वर्तते।

मलमूत्रान्विते स्थानेऽवस्थाणवयं जन्मगृहीतवन्तः। गर्भस्थं शिशुं तु प्रकृतिः स्वयं तेभ्यो नूनं रक्षति। साजरायुरूपेण वेष्टेन तान् वेशयति, अतएव मानवाः जरायुजाः इत्यभिधीयन्ते। गर्भाग्हंबहि रागातं सति बाह्य दोषेभ्यस्त्र। तुं विविधसंस्कारैः संस्कृतो मानवः स्वीयाम् अभिष्टाम्मुन्ततिं करोति। साम्प्रतिके युगे संस्काराणामाश्रयत्वात् अस्मदीयै तादृशीमनोवृत्तिः परिणतावर्तते।

मानव इच्छति यत्तस्य विकाशोऽभिवृद्धिश्च निर्विध्नं सम्पद्येतत संस्काराणां प्रधानभूतमुद्देश्यं वर्तते–अमाङ्गलिकप्रभावानां निराकरणाम् मांगलिकप्रभावाणां चावाप्ति। अभीष्ट प्रभावान् निराकर्तृं संस्कारेषु विविधोपायः आश्रियन्ते।

षोडशसंस्काराः सामाजिकसुव्यवस्था एवं पारिवारिकजीवनस्य विकाशे सर्वाधिकमहत्वं भजते। मानवस्य जीवनः संस्कारेण शुध्यति। जनमग्रहणानन्तरं मनुष्यः पूर्णतः संस्कृतरहितो भवति।

संस्कारवशादेव तस्य भौतिकम् आध्यात्मिकञ्च जीवनं देदीप्यमानं भवति। न केवलं मनुष्यस्य संस्कारैः शारीरिकं मानसिक, बौद्धिक एवं वैयक्तिकमुउत्कर्षं भवति अपितु तस्य सामाजिकं एवं धार्मिकजीवनमपि श्रेष्ठः भवति।

हिन्दूजीवनी पद्धतौ वर्णधर्म एवम् आश्रमधर्मस्य व्यवस्था शास्त्रेण विहितमासीत्। वर्णाश्रमस्य पूर्णसाफल्याय शास्त्रकारः संस्काराणां व्यवस्था कृतवान्। अपरिस्कृतं परिस्कृत्य तेषु विलक्षण योग्यतायाः प्रादुर्भावः संस्कारः भवति।

संस्कारशब्दस्य व्युत्पत्तिजन्य अर्थेन एवं ध्वनिः प्रस्फुटितसंस्करणं संस्कारः अथवा सम्यक् करणं संस्कारः यद्वा संस्क्रियतेऽनेन देहो मनः आत्मावेति संस्कारः। संस्कारशब्दस्य व्युत्पत्तिः संस्कृतस्य सम्पूर्वक कृञ्धातोः धञ्प्रत्यये निष्पन्नो भवति। सोऽयं संस्कारः व्यक्तेः शारीरिकः, सामाजिकः बौद्धिकः धार्मिक परिष्कार निमितम सः धार्मिकक्रिया भवति यः विशुद्धपवित्रानुष्ठाने विश्वासंकरोति। एष्वन्तर्गतेषु मनुष्यः स्वयं परिस्कृत्य स्वाध्यात्मिकविकाशं करोति। मनः परिष्करणम्, धर्मार्थसमाचरणम्, शुद्धिसन्निधानं एवं क्रियागतविधानः संस्कारस्य प्रमुखलक्षणममस्ति।

हिन्दूसमाजस्य सदस्यायानिवार्यधार्मिकविधानं संस्कारः वर्तते। जीवने नैतिकमाध्यात्मिकं एवं धार्मिकप्रवृत्तिद्वारा व्यक्तिः उत्कृष्टनिर्माणाय संस्कारः प्रमुखः कारणं भवति। संस्कारः योग्यता प्रदानं करोति। यथा योगयताञ्चदधाना क्रियाः संस्कारः इत्युच्यते।

जन्मग्रहणानन्तरमेव मानवस्य पूर्णता संस्कारणाम् प्रयोजनीयता दुश्यते। संस्कारवसादेव दोषमार्जनः अतिशयाधानं हीनाङ्गपूर्तेः कार्यं भवति। संस्कारेण मनुष्यस्य वैजिकं गर्भिकं दोषा अपगच्छन्ति। यथोक्तं मनुना–

> भर्गेहोमैर्जातकर्म चौल मौञ्जी निबन्धनैः, वैजिकं गार्भिकं चैनो द्विजानामपमृज्यत।।[1]

संस्काराणां लोकप्रियप्रयोजनं तथा संस्कारमाध्यमेनामङ्गलजनित प्रभावं निराकृत्यहितकरप्रभावप्राप्तये संस्कारास्य प्रयोजनीयता सर्वदाऽनुभूयते। अतः संस्काराणां यथार्थपर्यालोचनेन महत्वं साधु अवसीयते। यथा प्रतिपादितम् मनुना–

''वैदिकैः कर्मभिः पुण्यैर्निषेकादिद्विजन्मनाम्। कार्यः शरीरसंस्कारः पावनः प्रत्य चेहचारे इति मनूक्तिः संस्काराणामवश्यकर्त्तव्यं सूचयति। मनुष्यो जन्मतः प्रारम्य संस्कारैः संस्कृते भवति। अन्यथा स सर्व विद्येषु कर्मसु अयोग्यो भवति। आङ लभाषायां संस्कारशब्दः संक्रामेन्टशब्देन बहुलं ́(ममतंउमदज) शब्देन बहुलं व्यवह्रियन्ते। धार्मिकविधानमेव सेक्रामेन्ट शब्दस्यार्थः। साहित्ये शुद्धि प्रायश्चित्त व्रतादिषु अन्तर्भवति। संस्कारशब्दः दार्शनिकदृष्टया मीमांसका एवं वदन्ति–यथाङ्गभूत पुरोडाशादीनां विधिवत् शुद्धिरिति।[2] अद्वेतवेदान्तिनो जीवोपरि शरीरक्रियायाः मिथ्यारोपः प्रतिपादयन्ति।

नैयायिकाः भावस्य व्यक्तीकरणाय आत्मव्यञ्जकशक्तिः संस्कार इति कथयन्ति। वैशेषिकदर्शने चतुर्विंशति गुणेषु अन्तर्भवति संस्कारः। संस्कृतसाहित्ये संस्कारस्य प्रयोगः शिक्षा संस्कृति प्रशिक्षण–सौजन्य पूर्णता, व्याकरणगत शुद्धि–संस्करण–परिस्करण–शोभा–आभूषण–प्रभाव स्वरूपस्वभाव क्रिया अभिषेक विचार भावना–धारणापरिणाम–क्रियादिष्वर्थेषु प्रयुक्ताः दृश्यन्ते। कालिदास साहित्येऽपि विभिन्नेष्वर्थेषु संस्काराः व्यवह्रियन्ते। यथा रघुवंशो निसर्गसंस्कार विनीत इत्येतै।

> नृपेणचक्रे युवराजशब्दभाक।।[3]
> पुनश्च– प्रयुक्त संस्कार इवाधिकं वभौ।।[4]
> शाकुन्तलेऽपि स्वभाव सुन्दरं वस्तुनः संस्कारमपेक्षते।

धर्मशास्त्रे संस्काराणां प्रामुख्यमाचारभागः प्रकटी करोति। संस्काराणां विधि विधानं तत्सम्बन्धिनियमाश्च वर्ण्यन्ते। ते च संस्काराः मन्वादिस्मृतिकाराणां मतानुसारं भिद्यन्ते। यथा मनुना त्रयोदश, याज्ञवल्क्येन द्वादश, व्यासेन षोडश, विष्णुना, पञ्चदश, गौतमेन अष्टचत्वारिंशत, बौधायनेन चत्वारः, आपस्तम्बेन सप्तसंस्काराः वर्णिताः। यद् भवतु विभिन्न स्मृति निबन्धकाराणां मतानुसारं संस्काराणां भिन्नता प्रति पादितोऽपि मुख्यतः षोडश संस्काराणां वर्णनं विद्यते। अतएव मुख्यषोडशसंस्काराणाम् आधुनिके युगे शास्त्रेलोके च प्रामुख्येन चर्चा दृश्यन्ते ते इमे सन्ति, यथा[5]–

1. गर्भाधानम्, 2. पुंसवनम्, 3. सीमन्तोन्नयनम्, 4. जातकर्म, 5. नामकरणम्, 6. कर्णवेधः 7. बहिर्निष्क्रमणम्, 8. अन्नप्राशनम्, 9. चूड़ाकर्म, 10. वेदारम्भः, 11. उपनयनम्, 12. समावर्तनम्, 13. केशान्तः, 14. गोदानम्, 15. विवाहः, 16. अन्त्येष्टिश्चेति।

**निष्कर्षः –**

एवञ्चात्र संस्कृतसाहित्यस्य पुराणादि ग्रन्थादारभ्य कालिदासस्य रघुवंशे, अभिज्ञानशाकुन्तले च वर्णितसंस्काराणामधुनिके युगे वैज्ञानिकता प्रतिपादितो विद्यते।

**सन्दर्भाः –**

1. मनुस्मृति–2127।
2. मनुस्मृति–2126।
3. रघुवंश–3/18।
4. रघुवंश–3/19।
5. धर्मशास्त्रे, पृष्ठसंख्या–22।